REVIEW OF RESEARCH
ISSN: 2249-894X
IMPACT FACTOR : 5.7631(UIF)
UGC APPROVED JOURNAL NO. 48514
VOLUME - 8 | ISSUE - 9 | JUNE - 2019

# ।।नास्तिकदर्शनानुसारेण मोक्षः तन्निराकरणञ्च ।।

Sudipta Dey
Ph.D. Research Scholar, Department of Advaitavedanta, R. S .Vidyapeetha,
Tirupati, Andhra Pradesh.

**उपोद्घातः**

धर्मार्थकाममोक्षेषु मोक्षः परमपुरुषार्थत्वेन गण्यते। प्रायशः नास्तिकास्तिकदार्शनिकाः चार्वाकं विहाय मोक्षविषये स्वदर्शनानुसारं मोक्षस्वरूपं निरूपितवन्तः। तैर्निरूपितं मोक्षस्वरूपं कियत्पर्यन्तं विचाराघातं सहते इति अस्मिन् पत्रे मीमांस्यते।



**पारिभाषिकपदानि**

सङ्घातः, चैतन्यम्, मोक्षः, विज्ञानस्कन्धः, निरुपप्लवः, पुर्यष्टकम्, पुमर्थः, निरतिशयानन्दः, अखण्डाकारा वृत्तिः चेति भवन्ति पारिभाषिकपदानि।

**प्रबन्धसारः**

देहात्मवादिनः चार्वाकस्य दर्शने मोक्षचर्चा एव नास्ति। बौद्धदर्शने तु शून्यात्मक्षणिकविज्ञानात्मनोः अङ्गीकारेण आर्हतदर्शने देहपरिमानात्माङ्गीकारेण मोक्षानुपपत्तिरिति औपनिषदङ्गीकृता अविद्यनिवृत्त्युपलक्षितो निरतिशयानन्दबोधरूप आत्मा एव मोक्षः इति निरूपणम्।

**लोकायतिकाः मोक्षश्च**

मोक्षविषये अथवा मोक्षसाधनविषये पण्डिताः अथवा दार्शनिकाः भिन्नं भिन्नं मतं प्रतिपादयन्ति। प्रायः सर्वप्राणिनस्तावत्-

**यावज्जीवं सुखं जीवेन्नास्ति मृत्योरगोचरः।**
**भस्मीभूतस्य देहस्य पुनरागमनं कुतः।।** इति।

लोकायतिकाः लोके आयतिकाः इति लोकायतिकाः अर्थात् चार्वाकास्तु देह एव आत्मा इति कथयन्ति। तद्व्यतिरिक्तः परलोको नास्ति। लोकायतिकाः तावत् प्राकृतलोकानुसारिणः प्राकृतं लोकं यत् परिदृश्यमनं तदनुसारिणः पृथिव्यप्तेजवायुरिति भूतचतुष्टयविशिष्टसंघात एव चैतन्यमिति चिन्तयन्ति। चैतन्यमित्युक्ते ज्ञानम्। ते चैतन्यमिति पृथक् न स्वीकुर्वन्ति। चैतन्यसंघात एव देहः। अर्थात् शरीररूपेण परिणतं यत् जरायुजाण्डजस्वेदजुद्भिज्जरूपेण परिणतं यत् भूतचतुष्टयं तदेव चैतन्यमित्युच्यते। तथा चोक्तम्-

**तत्र पृथिव्यादीनि भूतानि चत्वारि तत्त्वानि। तेभ्य एव दोहाकारपरिणतेभ्यः किण्वादिभ्यो मदशक्तिवच्चैतन्यमुपजायते। तेषु विनष्टेषु सत्सु स्वयं विनश्यति**[1]। इति।

[1]सर्वदर्शनसंग्रह(चार्वाकदर्शनम्)

आगमेतिहासपुराणादिषु भूतव्यतिरिक्ततया चैतन्यमङ्गीक्रियते परन्तु चार्वाकाः देहादिव्यतिरिक्तं चैतन्यं नाङ्गीकुर्वन्ति। किञ्च एतेषां मते प्रत्यक्षव्यतिरिक्तम् अन्यत् प्रमाणं नास्ति। अनुमानेन आगमेन च देदाहिव्यतिरिक्तात्मा सिद्ध्यति परन्तु प्रत्यक्षेण तु देहादिव्यतिरिक्ततया चैतन्यं नोपलभ्यते तस्मात् चार्वाकानां मतानुसारेण प्रत्यक्षव्यतिरिक्तम् अन्यत् प्रमाणं नास्ति इत्ययं तात्पर्यार्थः।

चैतन्यं भूतचतुष्टयव्यतिरिक्तं भवति चेत् भूतचतुष्टयं भवति बन्धः तस्मात् बन्धात् मोक्षप्रसङ्गः स्यात्। परन्तु भूतचतुष्टयमेव आत्मा इति स्वीकार्ये सति मोक्षप्रसङ्ग एव न सम्भवति।

## खण्डनम्

एतेषां मते तु मोक्ष एव न सम्भवति। यतो हि देहस्येन्द्रियप्राणमनसां च भौतिकत्वेन विनश्वरत्वाभ्युपगमात्, तेषामेव च स्वरूपतो दुःखरूपत्वात् दुःखहेतुत्वाच्च, न तन्निवृत्तिसमये सत्तासमये वा दुःखनिवृत्त्यात्मकफलभागितावकाशः। देहस्य भौतिकत्वं श्रुतौ प्रतिपादितम्। यथा – अन्नमयं हि सोम्य मनः. आपोमयः प्राणः[2]। देहेन्द्रियाणि अर्थात् देहेन्द्रियप्राणमनांसि तावत् दुःखरूपाणि भवन्ति। देहेन्द्रियाणां जडत्वात् तानि दुःखरूपाणि भवन्ति। तस्मात् एतेषां मते मोक्ष एव न सम्भवति अतः तत्साधनविचारोऽपि न सम्भवति।

## बौद्धाः मोक्षश्च

देहेन्द्रियादिव्यतिरिक्तं विज्ञानस्कन्धं भवति बौद्धानां मतम्। एते तु चतुर्विधनैरात्म्यभावनया[3] तस्य सोपप्लवविज्ञानसन्तानस्यात्यन्तोपरमं वा निरुपप्लवसर्वज्ञसन्तानान्तर्भावं वा मोक्षमिच्छन्ति। एते तु क्षणिकविज्ञानमेव अङ्गीकुर्वन्ति। अर्थात् एतेषां नये प्रतिक्षणं विज्ञानं नश्यति विज्ञानान्तरमुत्पद्यते। अस्माभिः अनुभूयमानं यत् विज्ञानं तत् सोपप्लवविज्ञानम्। स्वोपप्लवं नाम् दुःखसहितम्। बौद्धदर्शनसम्बन्धं[4] विना जनिमात्रेण यत् विज्ञानं भवति तत् सोपप्लवविज्ञानम्। अथवा वेदान्तशास्त्रपठनं विना यत् विज्ञानेन वयं जीवामः तत् विज्ञानं सोपप्लवम्। चतुर्विधभावनाजन्यं यत् विज्ञानं तत् निरुपप्लवं विज्ञानम्। अद्वैतमते तु श्रवणमनननिदिध्यासनजन्यं यत् विज्ञानं तत् निरूपप्लवं विज्ञानम्। तस्मात् ते चतुर्विधनैरात्म्यभावनया तस्य सोपल्पवविज्ञानसन्तानस्यात्यन्तोपरमं कर्तुं शक्यते। अथवा निरुपप्लवसर्वज्ञसन्तानान्तर्भावं वा मोक्ष इति ते स्वीकुर्वन्ति। अर्थात्–

**आचार्यकृतिनिवेशनमपि अवधूतवचोऽस्मदादीनां रथ्योदकमिव गङ्गाप्रवाहपातःपवित्रयति।** इति

बाचस्पतिवचनानुसारं यथा रथ्योदकस्य गङ्गासङ्गमेन पवित्रतासिद्धिः तद्वत् सोपप्लवविज्ञानं तु निरुपप्लवपरमात्मविज्ञानेन यदि योज्यते तर्हि तदपि निरुपप्लवविज्ञानमेव भवति।

माध्यमिकाः अर्थात् सर्वशून्यवादिनस्तु शून्यमात्रमात्मानमुपयन्ताः, न किञ्चिदपि तत्त्वमस्ति, इति शून्यभावनाप्रकर्षपर्यन्तात् तत्त्वज्ञानाच्छून्यभावमेवापवर्गमाहुः।

---

[2]छान्दोग्योपनिषद्।

[3]ते च बौद्धाश्चतुर्विधया भावनया परमपुरुषार्थं कथयन्ति। ते च माध्यमिक योगाचार सौत्रान्तिकवैभाषिकसंज्ञाभिःप्रसिद्धा बौद्धा यथाक्रमं सर्वशून्यत्व बाह्यार्थ शून्यत्व बाह्यार्था नुमेयत्व बाह्यार्थ प्रत्यक्षत्व वादानातिष्ठन्ते। यद्यपि भगवान्बुद्ध एक एव बोधयिता तथापि बोद्धव्यानां बुद्धिभेदाच्चातुर्विध्यम् ।यथा गतोस्तमर्क इत्युक्ते जारचौरानूचानादयः स्वेष्टानुसारेणाभिसरणपरस्वहरणसदाचरणादिसमयं बुध्यन्ते। सर्वं क्षणिकं क्षणिकं दुःखंदुःखं स्वलक्षणं स्वलक्षणं शून्यं शून्यमिति भावनाचतुष्टयमुपदिष्टं द्रष्टव्यम् ।तत्र क्षणिकत्वं नीलादिक्षणानां सत्त्वेनानुमातव्यं यत्सत्तत्क्षणिकं यथा जलधरपटलं सन्तश्चामी भावा इति। सर्वस्य संसारस्य दुःखात्मकत्वं सर्वतीर्थकरसंमतम् ।अन्यथा तन्निविवृत्सूनां तेषां तन्निवृत्त्युपाये प्रवृत्त्यनुपपत्तेः।तस्मात्सर्वं दुःखंदुःखमिति भावनीयम् ।ततः स्वलक्षणं स्वलक्षणमिति भावनीयम् ।एवं शून्यं शून्यमिति भावनीयम् ।स्वप्ने जागरणे च न मया दृष्टमिदं रजतादीति विशिष्टनिषेधस्योपलम्भात् ।

[4]बौद्धदर्शनसम्बन्धो नाम तदुक्तचतुर्विधभावनापरिपाकजन्यंनिरूपप्लव सर्वज्ञ सन्तानान्तर भावयोग्य ज्ञाना विर्भावः।

## खण्डनम्

बौद्धानां मते तु क्षणिकविज्ञानं भवति आत्मा। क्षणिकविज्ञानञ्च भवति सोपप्लवविज्ञानम्। सोपप्लवविज्ञानञ्च भवति सर्वदुःखरूपम्। तस्य क्षणिकविज्ञानस्य निवृत्तौ स्वस्यैवाभावात्, कस्य मोक्षावकाशः। न च आत्मनो नाशः कस्याप्यभिमतो निरुपाधिप्रेमास्पदत्वात्।

**इयमात्मा परानन्दः परप्रेमास्पदं यतः।**
**मान भूवं हि भूयासमिति प्रेमात्मनीक्ष्यते[5]।**

स्वनाशापेक्षया दुःखेन साकं जीवनमेव वरं भवति। पुरस्तात् विषान्नं वर्तते चेत् तद्भोजनापेक्षया बुभुक्षया जीवनमेव वरम्। तस्मात् स्वनाशापेक्षया दुःखितया जीवनमेव वरम्। अतः बौद्धसम्मतस्वनाशरूपो मोक्षः नैवाङ्गीकार्यः।

केचन कुष्ठादिरोगेन पीडिताः सन्तः स्वनाशमपि वाञ्छन्ति अतः स्वनाशरूपो मोक्षऽस्तु इति चेन्न। एतत् देहव्यतिरिक्त आत्मा कश्चन वर्तते इति गमयति न तु आत्मनाशं गमयति। तस्मात् एतन्निदर्शनेन विज्ञानवादिभिः आत्मनाशद्वारा मोक्षो भवति इति निरूपयितुं न शक्यते।

एवं सर्वज्ञसन्तानान्तर्भावपक्षोऽपि निरस्तः, सर्वज्ञस्य सर्वसोपप्लवज्ञानाकारतया संसारिसन्तानापेक्षयापि सोपप्लवाधिक्येनात्यन्तदुःखरूपत्वात्, अन्यस्यान्यान्तर्भावानुपपत्तेश्च। अस्यायम् आशयो भवति यत् गङ्गाप्रवाहे किञ्चित् मलिनं जलं निक्षिप्यते चेत् गङ्गाप्रवाह कलुषितं न भवति। परन्तु तत्र अधिकं जलं मिश्रितं चेत् तत् कलुषितं भवति। तथैव प्रकृतावपि निरुपप्लवविज्ञाने प्रतिदिनं सोपप्लवविज्ञानं आधिक्येन गच्छति चेत् तत्र अधिकं दुःखं भवति न तु अल्पम्।

अतः सर्वज्ञविज्ञानोपरमः स्वनाशात् अङ्गीकर्तुं न शक्यते। सर्वज्ञसन्तानप्रवेशोऽपि नाङ्गीकर्तुं शक्यते। सन्तानः इत्युक्ते प्रवाहः। सन्तानी इत्युक्ते अवयवी। अवयवावयवीनोः अभिन्नत्वात् सर्वज्ञसन्तानस्यापि विनश्वरत्वमागमिष्यति, अविनश्वरत्वे वा स्थैर्यापत्तिरित्युपेक्षणीयासौगतमुक्तिः।

लोके सर्वदा कश्चन किञ्चित् काम्यति। परन्तु शून्यवादमतानुसारेण तु सर्वं शून्यमेव भवति तस्मात् तेषां मते मोक्ष एव न सम्भवति।

## जैनाः मोक्षश्च

एते देहेन्द्रियादिव्यतिरिक्तमात्मानम् अङ्गीकुर्वन्ति। परन्तु एतेषां मते तु देहपरिमाण एव आत्मा। एतन्मतानुसारेण तु देहेन्द्रियादिव्यतिरिक्तं देहपरिमाणमात्मानमभ्युपगम्य तस्य पुर्यष्टक[6]कर्माष्टक[7]परिवेष्टितस्य, आर्हतशास्त्रोक्तेन तपसा, आत्मैकाकारसमाधिना परिपाकेन चाष्टविधबन्धप्रध्वंसे सति, सुखैकतानस्य निरावरणज्ञानस्य सन्ततोर्ध्वगमनं भवति मोक्षः। एतदनुयायिनस्तु निरावरणज्ञानेन अर्थात् शुद्धज्ञाने सन्ततोर्ध्वगमनं भवति अर्थात् आकाशगमनं भवति इति कथयन्ति। तच्च आकाशगमनम् अलौकिकम् अर्थात् सर्वसंसाररहितं भवति न तु लौकिकम्। तत्प्रति उदाहरणं यथा पञ्जरभञ्जन इव पञ्जरस्थस्य शुकस्य स्वातन्त्र्यम् इति। अर्थात् कश्चन पक्षी यदा पञ्जरात् विमुक्तो भवति तदा स यथा स्वातन्त्र्येन गगने विहरति तद्वत् पुर्यष्टकर्माष्टकरहितो जीवः अलौकिकाकाशे विहरणं करोति। सैव मोक्ष इत्युच्यते इति।

---

[5]पञ्चदशी(1.8)

[6]पुर्यां शरीररूपायामष्टकं पुर्यष्टकम् ।पुर्यष्टकं नाम प्रतिपुरुषं नियतः सर्गादारभ्य कल्पान्तं मोक्षान्तं वा स्थितः पृथिव्दिकलापर्यन्तस्त्रिंशत्तत्त्वात्मकः सूक्ष्मो देहः।

[7]कर्माष्टकानि तावत् 1) ज्ञानावरण 2) दर्शनावरण, 3) वेदनीय, 4) मोह्नीय, 5) आयुः, 6) नाम, 7)गोत्र, 8) अन्तराय चेति।

## खण्डनम्

आर्हतपक्षे यत् सततोर्ध्वगमनम् अर्थात् अलौकिकाकाशगमनं यत् उक्तमस्ति सा क्रिया भवति। सततोर्ध्वगमनमित्युक्ते सति क्रिया संसूचिता भवति। अर्थात् क्रियात्मकः मोक्ष इति प्रतीयते।क्रियात्वात् मोक्षस्य विनाशत्वं सम्भवति। तस्मात् मोक्षस्य अनित्यता प्रसङ्गः आपतति, क्रियात्वेन विनाशित्वात्। न वा अपुनरावृत्तिलक्षणमोक्षकामनाविषयताः सम्भवन्ति। ससतोर्ध्वगमनं मोक्ष इति तु क्रिया भवति। अथवा ससतोर्ध्वगमनजन्यं सुखं मोक्ष वा। तस्मात् क्रिया मोक्ष इति न सम्भवति, तस्य अनित्यताप्रसङ्गात्। अपि च क्रियाजन्यं मोक्ष इत्यपि न सम्भवति, मोक्षस्य जन्यत्वप्रसङ्गात्। तस्मात् आर्हतानां पक्षे तु उभयतः पाशारज्जुरेव। ननु अजन्यत्वमेव मोक्ष इति भवतु। इति चेत् न, अजन्यत्वे सर्वस्यापि सिद्धत्वात् मुक्तसंसारिणोरविशेषात् स एव दोष आपतति।

संसारदशायां कर्माष्टकेन तदावृतम्, कर्माष्टकनिवृत्तौ तु निरावरणं सुखमिति चेत् न, कर्मणामावरणत्वस्य कुत्राप्यदर्शनात्। किञ्च तैरुक्तं यत् आत्मा देहपरिमाणकः। देहानां च अव्यवस्थितपरिमाणवत्त्वात् आत्मन अपि नियतपरिमाणत्वं न सम्भवति। यथा गजमशकशरीरादौ अवयवोपचयत्वाङ्गीकारेण गजशरीरे आत्मा गजपरिमाणः, मशकशरीरे आत्मा मशकपरिमाणो भवति। तदानीं गजशरीरगतात्मा कर्मवशेन मशकशरीरं प्राप्नोति चेत् पूर्वं गजपरिमाणात्मनः अपचय आवश्यकः। एवं मशकशरीरात्मा कर्मवशेन गजजन्मप्राप्नोति चेत् उपचय अर्थात् बृद्धिर्भवति। अपचयोपचयौ यस्य भवतः स नित्यो न भवति। तथा हि परिणामभेदे आत्मनः विनाशो भवति प्रदीपादिवत्। द्रव्यभेदं विना परिमाणभेदानुपपत्तेः। प्रत्यभिज्ञया[8] वस्तुस्थितिरित्यभ्युपगमेऽपि सावयवत्वेन विनाशित्वध्रौव्यात्, न अविनाशिमोक्षफलभागिता, विनाशिनः फलस्य तु स्वर्गादान्तर्भावेन नात्यन्तपुमर्थमोक्षरूपता इति आर्हतसततोर्ध्वगमनरूपा मुक्तिर्सङ्गता।

## उपसंहारः

अतः विचारितरीत्या उपर्य्युक्तदार्शनिकाभिमतमोक्षस्य दोषग्रस्तत्वात् अद्वैतदर्शनानुसारी मोक्ष एव निर्दुष्ट इति तत् प्राप्यर्थं तदुक्तसाधनानुष्ठनमेव कर्तव्यमिति भाति।

## सहायकग्रन्थसूची

1. Mainkar, T.G, Sarva Darsana Sangraha of Sayana Madhava, Third Edition, Bhandarkar oriental Research Institute, Poona, 1978.
2. Karmakar,R.D, Vedanta Kalpalatika, Bhandarkar oriental Research Institute, Poona, 1962.
3. गौतम, डॉ चमनलाल, श्री पञ्चदशी, संस्कृति संस्थान, बरेली, उत्तरप्रदेश, 1681.
4. शास्त्री, सं. एस. सुब्रह्मण्यशास्त्री, उपनिषद्भाष्यम्, खण्डः-1-3, श्री दक्षिणामूर्तिमठ प्रकाश, वाराणसी.
5. SlokaYati, Sri Uttama, Brhadaranyakavartikasara, Chowkhamba Sanskrit Series Office, Varanasi, 1998.

[8]सैयं दीपज्वला इति प्रत्यभिज्ञया परिणामिनित्यत्वे सिद्धेऽपि कूटस्थनित्यता न सिद्ध्यति इत्यभिप्रायः।